सप्तद्वीपसमुद्रान्ता रत्नधान्यसमन्विता ।
सशैलवनपुष्पाढ्या तेन दत्ता मही भवेत् ॥"
अन्यत्र च ।
"बोधनी जगदाधारा कार्त्तिके शुक्लपक्षतः ।
रथस्थो यत्र भगवांस्तुष्टो यच्छति वाञ्छितम् ॥
भजन्ति ये रथारूढ़ं देवं सर्व्वेश्वरेश्वरम् ।
तेषां यात्रा कृता नृणां कामानिष्टान् प्रयच्छति ॥
श्रीकृष्णरथशोभां ये प्रकुर्व्वन्ति प्रहर्षिताः ।
तेषां मनोरथावाप्तिं यच्छते पुरुषोत्तमः ॥
कृष्णस्य रथशोभां ये प्रकुर्व्वन्ति स्वशक्तितः ।
वाञ्छितं तेभ्यो यच्छन्ति नित्यं सूर्य्यादयो ग्रहाः ॥
कृष्णस्य रथशोभां ये प्रकुर्व्वन्ति सुहर्षिताः ।
पदे पदे तथा पुत्त्र ! पुण्यं तेषां प्रयागजम् ॥
रथयात्रास्थिते कृष्णे जयेति प्रवदन्ति ये ।
जयेति च पुनर्ये वै शृणु पुण्यं वदाम्यहम् ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
वाराणस्यादितीर्थेषु देवानाञ्चैव दर्शने ।
यत् पुण्यं कविभिः प्रोक्तं कार्त्तिकेन च नरेश्वर ! ॥
जयशब्दे कृते विष्णौ रथस्थे तत् फलं स्मृतम् ।
रथस्थितो नरैर्यस्तु पूजितो धरणीधरः ।
यथालाभोपपन्नैश्च पुष्पैर्भक्त्या समर्च्चितः ॥
ददाति वाञ्छितान् कामानन्ते च परमं पदम् ।
मङ्गलं ये प्रकुर्व्वन्ति धूपदीपांस्तथा स्तवम् ॥
नैवेद्यं वस्त्रपूजाञ्च भक्त्या नीराजनं हरेः ।
रथारूढ़स्य कृष्णस्य संप्राप्ते हरिवासरे ॥
फलं न तन्मया ज्ञातं जानाति यदि केशवः ।
ब्रह्मस्वहारी गोघ्नश्च भ्रूणहा ब्रह्मनिन्दकः ॥
महापातकयुक्तोऽपि ब्रह्महा गुरुतल्पगः ।
मद्यपः सर्व्वपापोऽपि कलिकालेन मोहितः ॥
रथाग्रतः पदैकेन मुच्यते सर्व्वपातकैः ॥"
किञ्चान्यत्र ।
"रथारूढ़े महाविष्णौ ये कुर्व्वन्ति जयस्वनम् ।
पूजाञ्चाखिलपापेभ्यो मुक्ता यान्ति हरेः पदम् ॥"
किञ्च ।
"रथस्याकर्षणं पूर्व्वं कुरुते दैत्यनायकः ।
ततः सुराः सिद्धसङ्घा यक्षा गन्धर्व्वमानवाः ॥
इत्यञ्च रथयात्राया विधिर्यत्नः स्मृतोऽभवत् ।
तथापि कश्चित्तत्रान्यो विशेषोऽपि वितन्यते ॥"
अथ रथयात्राविधिः ।
"श्रीकृष्णं तु रथारूढ़ं कृत्वा जयजयध्वनिम् ।
निष्पाद्य च महापूजामाशीर्वादानि कीर्त्तयेत् ॥"
तथा च विष्णुधर्म्मे ।
"वक्त्रं नीलोत्पलरुचि लसत्कुण्डलाभ्यां सुन्दरं
चन्द्राकारं रचिततिलकं चन्दनेनाचितेन ।
गत्वा लीलां जनसुखकरीं प्रेक्षणीनाम्ततीव
पद्मावासां सततमुरसा धारयन् पातु विष्णुः ॥
युक्तः शैलादिवाहैर्मधुरतररणत्किङ्किणीजालमाले-
रत्नौघैर्मौक्तिकानामविरतमणिभिः संभृतेश्चैव हारैः ।
हैमैः कुम्भैः पताकाशिवतररुचिभिर्भूषितः केतुसख्यै-
श्चक्रैर्न्नेमिप्रवन्धो दुरितहरहरैः पातु जैत्रो रथो वः ॥
मोदन्तां सुजना स्वनिन्दितधियः सन्तात्खिलोपद्रवाः
सस्याः सुस्थिरबुद्धयः प्रतिहतामित्रा रमन्तां सुखम् ।
रे दैत्या गिरिगह्वराणि गहनान्याशु व्रजध्वं भयाद्दैत्यारिर्भगवानयं यदुपतिर्यानं समारोहति ॥
पलायध्व पलायध्वं रे रे दितिजदानवाः ।
संरक्षणाय लोकानां रथारूढ़ो हृकेश्वरी ॥
ततो विचित्रगद्यानि पठित्वाथ महाप्रभोः ।
महाप्रसादमालाञ्च स्वीकुर्य्यात् परया मुदा ॥"
तन्माहात्म्यञ्चोक्तम् ।
"भक्त्या गृह्णाति यो मालां वैष्णवीं मङ्गलाश्रयाम् ।
न तेषां दुर्लभं किञ्चिदिह लोके परत्र च ॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामसमृद्धये ।
मालामेतां प्रगृह्णीयात् सौख्यमोक्षप्रदायिनीम् ॥"
इति ॥
"संचिन्त्याक्षय्यमाराध्य श्रीप्रह्लादादिभी रथम् ।
आकृष्य प्रेरयन् पूर्य्यां भ्रामयेद्वैष्णवैः सह ॥"
तथा च भविष्योत्तरे तत्रैव ।
"नृत्यमानैर्भागवतैर्गीतवादित्रनिस्वनैः ।
भ्रामयेत् स्यन्दनं विष्णोः पुरमध्ये समन्ततः ॥"
किञ्च ।
"प्रबोधवासरे प्राप्ते कार्त्तिके पाण्डुनन्दन ! ।
देवालयेषु सर्व्वेषु पुरमध्ये समन्ततः ॥
भ्रामयेत्तूर्य्यनिर्घोषै रथस्थं धरणीधरम् ॥"
किञ्च ।
"रथागमे मुकुन्दस्य पुरशोभान्तु कारयेत् ।
सर्व्वतो रमणीयन्तु पताकैरुपशोभितम् ॥
तोरणैर्बहुभिर्युक्तं रम्भास्तम्भैश्च शोभितम् ।
स्थाने स्थाने महीपाल ! कर्त्तव्यं पुण्यसंयुतम् ॥
विचित्ररथशोभा च कर्त्तव्या भावितैर्नरैरिति ॥
रथेन गच्छन् भगवाननुगम्योऽखिलैर्जनैः ।
स्वगृहागतश्चार्च्योऽन्यथा दोषो महान् भवेत् ॥" * ॥
अथ रथानुगमनफलता । तत्रैव ।
"रथेन सह गच्छन्ति पार्श्वतः पृष्ठतोऽग्रतः ।
विष्णुनैव समाः सर्व्वे भवन्ति श्वपचादयः ॥
रथस्थं ये न गच्छन्ति भ्रममाणं जनार्द्दनम् ।
विप्राध्ययनसम्पन्ना भवन्ति श्वपचाधमाः ॥"
किञ्च ।
"येषां गृहागतो याति रथस्थो मधुसूदनः ।
पूजा तैस्तैः प्रकर्त्तव्या वित्तशाठ्यविवर्ज्जितैः ॥
अनर्च्चितो यदा याति गृहाद्यस्य महीधरः ।
पितरस्तस्य विमुखा वर्षाणां दश पञ्च च ॥
यः पुनः कुरुते पूजां गृहायाते तु माधवे ।
वसते श्वेतद्वीपे तु यावदिन्द्राश्चतुर्द्दश ॥"
अन्यत्र ।
"नानुव्रजति यो मोहाद्व्रजन्तं जगदीश्वरम् ।
ज्ञानाग्निदग्धकर्म्मापि स भवेद्ब्रह्मराक्षसः ॥"
इति ॥
"अथ स्वमन्दिरं नीत्वा पूर्व्ववत् पूजयेत् प्रभुम् ।
रात्रौ जागरणं कुर्य्याद्विधिवद्वैष्णवैः समम् ॥"
अथ प्रबोधनीजागरणमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"पूर्व्वजन्मसहस्रेषु पापं यत् समुपार्ज्जितम् ।
जागरेण प्रबोधन्यां दह्यते तूलराशिवत् ॥
कृत्वापि पातकं घोरं ब्रह्महत्यादिकं नरः ।
कृत्वा जागरणं विष्णोर्धूतपापो भवेन्मुने ! ॥
कर्म्मणा मनसा वाचा पापं यत् समुपार्ज्जितम् ।
क्षालयेत्तच्च गोविन्दः प्रबोधन्यान्तु जागरे ॥
दुष्प्राप्यं यत् फलं विप्रैरश्वमेधादिभिर्मखैः ।
प्राप्यते तत् सुखेनैव प्रबोधन्यान्तु जागरे ॥
आप्लुत्य सर्व्वतीर्थानि दत्त्वा गां काञ्चनीं महीम् ।
न तत् फलमवाप्नोति यत् कृत्वा जागरं हरेः ॥
चन्द्रसूर्य्योपरागे तु यत् फलं परिकीर्त्तितम् ।
तत्सहस्रगुणं पुण्यं प्रबोधन्यान्तु जागरे ॥
स्नानं दानं तपो होमः स्वाध्यायश्चार्च्चनं हरेः ।
तत् सर्व्वं कोटिगुणितं प्रबोधन्यान्तु जागरे ॥
समतीतं भविष्यञ्च वर्त्तमानं कुलायुतम् ।
विष्णुलोकं नयत्याशु जागरेण प्रबोधनी ॥
चलन्ति पितरो हृष्टा विष्णुलोकमलङ्कृताः ।
विमुक्ता नारकैर्दुःखैः कर्त्तुः कृष्णप्रजागरम् ॥
भार्य्यापक्षे तु ये जाता मातृतः पितृतस्तथा ।
तारयेन्नात्र सन्देहः प्रबोधन्यां तु जागरे ॥"
किञ्च ।
"फलैर्नानाविधैर्द्दिव्यैः प्रबोधन्यान्तु जागरे ।
शङ्खे तोयं समादाय अर्घ्यं दद्याज्जनार्द्दने ॥
यत् फलं सर्व्वदानेषु सर्व्वतीर्थेषु यत् फलम् ।
तत् सर्व्वं कोटिगुणितं दत्त्वार्घ्यं बोधवासरे ॥"
पाद्मे च तत्रैव ।
"अन्यत्रापि प्रिया विष्णोर्जागरे स्यात् प्रबोधनी ।
किं पुनर्मथुरायां सा ततो वै जन्मसद्मनि ॥
एकैवैकादशी कृष्णजन्मगेहे कृता नरैः ।
ततोऽधिकं न कर्त्तव्यं लोके किञ्चन विद्यते ॥
रात्रौ जागरणं तत्र प्रीत्या कुर्व्वन्ति ये नराः ।
संसारे मोहसम्प्राप्ते सदा जाग्रति जाग्रति ॥"
किञ्च तत्रैव श्रीराधिकोपाख्यानान्ते ।
"सुबोधनीजागरपुण्यवैभवात्
प्रसन्न ईशो विधिवाक्यसत्यकृत् ।
चकार रासोत्सवनर्त्तनं सह
वृन्दावनेऽन्याभिरपीह राधया ॥
सा नृत्यमानाद्भुतगोपरूपिणा
कृष्णेन जन्मान्तरवाञ्छितेन ।
राधा महाप्रेमजवाकुलेन्द्रिया
निन्येऽन्यलोकं कथया कृतार्थताम् ॥
तस्मात् सुबोधनीं कृत्वा रात्रौ कृत्वा च जागरम् ।
सुप्तोत्थितं हरिं दृष्ट्वा का भीः संसारजा द्विजाः ॥